# पाठशालाविधिः तत्स मीक्षणञ्च

प्रो. सुदेशकुमारशर्मा

परम्परागतविधि: संस्कृतशिक्षणस्य शास्त्रीयविधिषु सर्वप्राचीन: अस्ति। एतस्य विधे: प्रचलनं वैदिककालादारभ्य अद्य पर्यन्तं दृश्यते। गुरुकुलेषु कण्ठस्थीकरणपुरस्सरं शिक्षणं क्रियते स्म इति कारणत: अस्य विधे: मौखिकविधि: इति नाम जातम्। अस्य विधे: मौखिकविधि: , गुरुकुलविधि:, पाठशालाविधि:, पण्डितविधि:, व्यासविधि:, वैदिकविधि:, आश्रमविधि: चेत्यादीनि नामान्तराणि अपि श्रूयन्ते।

**ऐतिहासिकी पृष्ठभूमिः**

पाठशालाविधि: प्राक्तनाया भारतीयशिक्षापद्धत्याः प्रातिनिध्यं विदधाति। आवैदिककालात् अद्यावधिं यावत् पद्धतिरियं प्रवर्तमाना वर्तते। सप्तदशशताब्दी यावत् पाठशालासु, आश्रमेषु, गुरुकुलेषु, मठेषु, विद्यापीठेषु च शिक्षापद्धत्याः प्रवर्तनं नियमितमासीत्। तस्मिन्नेव समये योरोपदेशीया विद्वांसो धार्मिकप्रचारकाश्चापि संस्कृताध्ययनं प्रारभन्त। 'ईस्ट - इण्डिया कम्पनी' इत्याख्यया आंग्लसंस्थयाऽपि एतदध्ययनं प्रोत्साहितम्। 1835 ख्रीष्टाब्दावधिं यावत् योरोपीया विद्वांसो न केवलमेतत् विकासितवन्तः अपितु संस्कृतसाहित्यस्य अलौकिकं सुधारसमपि आस्वादितवन्तः। परम्, 1835 ख्रीष्टाब्दे मैकालेमहोदयस्य विज्ञप्ति: संस्कृताध्ययने वज्रपात इवानुभूयत। परिणामतः, समुद्घटितेषु आंग्लविद्यालयेषु आंग्लमाध्यमेन योरोपीयविज्ञानं योरोपीयकलाश्चैव आश्रित्य अध्ययने समधिकं बलं प्रदत्तम्। संस्कृताध्ययनम् उपेक्षितमभूत्। अस्मदीयाः स्वेदशीयाः पाठशाला जनानाम् अनुदानाश्रिता अभूवन्। तथाऽपि एतासाम् अस्तित्वं अविरतमेवातिष्ठत्। इत्थं 1835 ख्रीष्टाब्दे शिक्षापद्धतिः द्वेधा विभक्ताऽभवत् (१) स्वदेशीया (२) वैदेशिकी। द्वैधीभूता सैषा प्रणाली आंग्लशासनस्य अवदानम्। संस्कृतभाषा, अपराः प्राच्यभाषाश्च आंग्लविद्यालयेषु महाविद्यालयेषु यद्यपि पाठ्यमाना आसन्, परं तासां शिक्षणरीतिस्तु नूतनैवासीत्। एता ऐच्छिकविषयत्वेन आंग्लमाध्यममाश्रित्य पाठ्यन्ते स्म। विश्वविद्यालयस्तरे चैता भाषा ऐतिहासिकं, भाषीयम्, आलोचनात्मकं च पाश्चात्त्यदृष्टिकोणमनुसृत्य अपाठ्यन्त। संस्कृतं प्रति अपेक्षितं विशेषावधानं न प्रदत्तम्। सा तु अस्तावस्थायामेव अपाठ्यत। संस्कृतशिक्षणस्य पाश्चात्त्येयं प्रणाली अद्यावधिं यावत्

विश्वविद्यालयेषु प्रवर्तते, याऽन्ततः संस्कृतविषये 'एम. ए.' इत्युपाधिं प्रयच्छति। शासनपक्षतः पाठशालाप्रणाली अत्यल्पं प्रोत्साह्यते, अतः सा महत्युपेक्षिता जाता। पाठशालाप्रणाल्या ह्रासस्तु भारतीयशिक्षापद्धत्या एव ह्रासो मन्त व्य।: प्रणाल्या अस्याः प्रमुखतत्त्वानि ज्ञातुं पुरातनाया भारतीयशिक्षापद्धत्याः संक्षिप्त विवरणं प्रस्तूयते-

**प्राचीनशिक्षाया व्यवस्था -**

प्राचीना शिक्षापद्धतिः हिन्दू-आर्याणां सामाजिकव्यवस्थाया विकासं लब्धवती। अस्यां व्यवस्थायां जीवनस्य चतस्र: अवस्थाः अनुसृत्य मानवस्य कर्तव्यानि निर्धारणमवाप्नुवन्। एवमेव चतुर्णां वर्णानाम् आजीविकाया अपि उचितः कश्चन प्रबन्ध अत्र आसीत्। शिक्षादानम् आश्रमेषु, गुरुकुलेषु, पाठशालासु चानुष्ठीयते स्म। धर्मः, अर्थः, कामः, मोक्षश्चैतान्येव शिक्षाया उद्देश्यानि आसन्। पराविद्या, अपराविद्या चेति द्विविधे विद्ये स्फुटं परिभाषिते आस्ताम्। उपनयन (गुरोः समीपे नयनम् ) प्रभृतिभिः विशिष्टसंस्कारैः छात्रजीवनं प्रारभते स्म । दीक्षितोऽयं छात्र आश्रमविधिमाश्रित्यैव स्वीयमध्ययनं प्रवर्तयति स्म । सकलेऽपि समये आश्रमवासित्वात् शिक्षकेण सह छात्रस्य घनिष्ठः सम्बन्धो जायते स्म । शिक्षकस्य अधिकसमीपवर्तित्वात् सोऽन्तेवासी (यो गुरोः समीपे वसेत् ) इत्यभिधीयते स्म । सम्बन्धोऽयं पाठ्यक्रमसहगामित्वात् परिवर्तितो विस्तृतश्चाभूत्। आरम्भावस्थायां द्वादशवर्षात्मकं वेदाध्ययनमेव प्रधानविषय आसीत् । ततः षण्णां सहायकविषयाणां वेदांगपदवाच्यानां शिक्षा-छन्दः-व्याकरण-निरुक्त-ज्योतिष-कल्पादीनाम् अध्ययनमभवत्। षड्दर्शने प्रादुर्भूते सति सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसाप्रभृतीनां दर्शनानामपि समावेश : पाठ्यक्रमे विहितः । ततश्च धर्मशास्त्रं कालान्तरे अर्थशास्त्रञ्चापि समाविष्टमभूत्। 100 ख्रीष्टपूर्वे मूर्तिकला, आयुर्वेदः, नाटकम्, कला, पुराणानि - इत्येता व्यावहारिककलाः, अन्ये व्यावसायिका विषयाश्चापि अध्ययनसूच्याम् अविद्यन्त । तदानी नैका भारतीया लिपयः प्रचलिता आसन् । ततो व्यावहारिकशिक्षा विकासं प्राप्नो त् , चतुःषष्टिकलाः, वाणिज्यम्, सैनिकविज्ञानमित्यादयो विषयास्तस्यां समाविष्टा अभूवन् । गुप्तयुगे संगीतम्, नाटकम् , साहित्यिकसमालोचना , कोषकार्यम् , व्याकरणम् , शारीरिकविज्ञानम् , नाडीविज्ञानम्, आयुर्वेदः, ज्योतिषम्, गणितञ्चेत्यादयो नैके विषया विकासमवाप्नुवन् । शिक्षणं बहुधा मौखिकरूपेणैव प्रावर्तत । स्मरणकार्यार्थमधिकं बलं प्रदीयते स्म । पाठानाम् अध्ययनात् परं विधौ अर्थवादे च सम्यक् विचारो भवति स्म । गभीरचिन्तनाय विचारवादाय चोपयुक्ता अवसरा अपि कल्प्यन्ते स्म । अर्जितस्य ज्ञानस्य प्रयोगाय वैयक्तिकयोजना अपि प्रादीयन्त ।

समग्रे शिक्षणे वैयक्तिकसम्पर्कस्य प्राधान्यं लक्ष्यते स्म । अध्यापक-छात्रयोः मिथः सम्बन्ध आदर्शमय आसीत् ।

उपर्युक्तं संक्षिप्तविवरणं प्राचीनायाः शिक्षापद्धत्याः प्रमुखतत्त्वानां दिग्दर्शनं प्रस्तौति , अपि च, पाठशालासु संस्कृतशिक्षणप्रणाल्या भूमिकारूपं वर्तते ।

**पाठशालाविधेः उद्देश्यानि-**

साम्प्रतिकी पाठशालाशिक्षणप्रणाली प्राचीनशिक्षाप्रणाल्याः समुचितं रूपं न भजते , परमेतस्या आधारस्तु प्राचीन एव वर्तते । यदि वयं योग्यतायाः , विद्वत्तायाः, अध्यापकच्छात्रयोः सम्पर्कस्य, पाठ्यक्रमस्य , शिक्षणगाम्भीर्यस्य , कठोरानुशासनस्य च दृशा समालोचयेम , तर्हि अतीव शैथिल्यं ह्रासश्चानुलक्ष्यते । परमेतस्या उद्देश्यानि तानि प्राचीनान्येव प्रवर्तन्ते -

१. वर्तमानस्य ज्ञानसंग्रहात्मकस्य उद्देश्यस्य स्थाने ज्ञानस्य हृदयंगमीकरणात्मकमेव परमोद्देश्यं वर्तते । अस्मदीयायाः संस्कृतेः सम्प्रेषणीयतामेव विधिरयम् उद्दिशति ।

२. उपुर्यक्तोद्देश्यस्य पू र्त्यैःशास्त्राणां टीकानां च गहनाध्ययनम् , येन वेद-वेदांग -व्याकरण-षड्दर्शन-ज्योतिष-आयुर्वेदप्रभृतयो विषया निश्शेषम् अधिकृता भवेयुः ।

३. विधिरयमुद्दिशति यत् विशेषतः शास्त्रार्थसमये गहनया स्मरणशक्त्या ज्ञानस्य उपादेयता प्रयोगश्च साधयितुं शक्येत ।

४. प्रतिभाशालिनां छात्राणां सर्जनं, ये आत्मसंयमे , मौलिकचिन्तने , तर्कश क्तौ-, चिरस्थायिन्यां स्मृतौ सन्तुलितजीवनस्य यापने च प्रशिक्षिताः भवेयुः । अपरशब्देषु 'आदर्श - पण्डितनिर्माणम्' इत्यपि वक्तुं शक्यते ।

५. स्वाध्यायस्य नियमिताभ्यासमपि विधिरयम् उद्दिशति , येन ज्ञानं सर्वदा नवीनमुपयोगि च तिष्ठेत् ।

६. शास्त्रार्थे प्रशिक्षणमपि उद्देश्यभूतम् । न्यायशास्त्रस्य प्रयोजनं वादे, छले निग्रहस्थानादौ च दक्षताविधानं वर्तते ।

**परम्परागतविधेः विशेषताः**

'शतं वद एकं मा लिख ' इत्यादिवचनैः ज्ञायते यत् पाठशालाविधौ अध्यायने अध्यापने च भाषणस्य महत्त्वम् अधिकम् आसीत्। वैदिकसंहितानाम् अन्येषां च ग्रन्थानां कण्ठस्थीकरणम् अनिवार्यं प्रशस्तं च आसीत्। यथा हि -

**पुस्तकस्था तु या विद्या, परहस्तगतं धनम्।**
**कार्यकाले समायाते न सा विद्या न तद् धनम्॥**[ii]

अर्थात् या विद्या केवलं पुस्तके अस्ति , कण्ठे नास्ति सा तथैव व्यर्था भवति यथा सङ्कटकाले अन्यस्मै दत्तम् अस्माकम् एव धनम् अस्माकम् उपयोगाय न भवति। पाठशालाविधे: अन्यानि वैशिष्ट्यानि सन्ति, यथा -

- ब्रह्मचर्यस्य प्रधानता।
- शान्ते प्राकृतिकवातावरणे शिक्षा।
- गुरुगृहे आश्रमे वा अनिवार्यतया निवास:।
- उत्तमगुरुशिष्यसम्बन्ध:।
- व्यक्तिगतम् अवधानम्।
- नियमत: पाठस्य पारायणे कण्ठस्थीकरणे च विशेष-आग्रह:।
- कर्तव्यपरायणतायाम् अनुशासने च विशेष-आग्रह:।
- संस्कृतव्याकरणस्य वैदिकसंस्काराणां च विशेषप्रशिक्षणम्।

**परम्परागतविधौ वैदिकसंस्कारा:**

अस्मिन् विधौ गुरु-शिष्य-सम्बन्ध: प्रगाढ: आसीत्। गुरु: मातृवत् शिष्यस्य संरक्षणं करोति स्म। यथा उक्तम् -

**आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्त:।**
**तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवा:**[ii]**।**

अर्थात् यथा गर्भावस्थायां बालक: मातु: अतिशय-सान्निध्ये भवति तथैव गुरुकुले रात्रित्रयं यावत् आचार्य: अपि ब्रह्मचारिणं बालकम् आत्मन: सान्निध्ये संस्थाप्य तस्य पूर्वज्ञानम् , रुचिं सामर्थ्यं च ज्ञात्वा तस्य ज्ञानपोषणं मार्गदर्शनं च करोति। अत्र रात्रित्रयम् अर्थात् प्रकृतिविषयकं जीवात्मविषयकं परमात्मविषयकम् इति त्रिविधम् अज्ञानम् इति वक्तुं शक्यते। अस्मिन् अवधौ आचार्य: तं बालकं पाठयितुं पाठ्यक्रमस्य शिक्षणविधे: च विषये अपि निर्धारणं करोति। अस्मात् मार्गदर्शनात् परं तस्य बालकस्य पुनर्जन्मवत् आध्यात्मिक-जीवनारम्भस्य नवीन: उल्लास: भवति, अत: हर्षिता: विद्वांस: **(विद्वांसो वै देवा:)**[iii] तस्य बालकस्य अभिनन्दनम् आचरन्ति इति भाव:।

कालान्त्रे औपचारिकाध्यपयनावसाने समावर्तनसंस्कारेण ब्रह्मचारी स्नातक: जायते। अस्मिन् स्नानकर्मणि मन्त्राभिषेकादिपूजनेन पवित्रीकृतै: क्रमश: अष्टभि: तीर्थजलपूर्ण-कुम्भै: स्नानं करोति। तत: मेखला-दण्ड-मृगचर्मादीनां विधिवत् परित्यागं कृत्वा वस्त्रालङ्कारादीनां धारणं करोति। तत: परम् आचार्य: स्नातकं शिष्यं गृहस्थधर्मस्य परिपालनाय उपदेशं ददाति।

**परम्परागतविधौ पाठ्यक्रम:**

पाठशालाविधौ शास्त्रीयपाठ्यक्रम: निर्धारित: आसीत्। पाठ्यक्रमे पराविद्या अपराविद्या इति विद्याया: प्रकारद्वयम् अभ्यसनीयम् आसीत्, यथा हि –

*द्वे विद्ये वेदितव्ये परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेद: सामवेदोऽथर्ववेद: शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते॥*

विष्णुपुराणे अवान्तररूपेण विद्याया: १४ भेदा: अपि उक्ता: सन्ति, तद्यथा -

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर:।**
**पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।।**

पारम्प रिकशिक्षाया: पाठ्क्रमस्यथ सामान्यंग विवरणम् अधोलिखितमस्ति।

१. अयं पाठयक्रमोऽष्टतः दशवर्षावधि प्रवर्तते । अयं पाठ्यक्रमः शब्दावल्याः , समासचक्रस्य, अमरकोषस्य, धातुरूपावल्याश्च कण्ठस्थीकरणेन प्रारभते । रूपावल्याः पुस्तकानि संज्ञानां सर्वाण्यपि रूपाणि प्रस्तुवन्ति । छात्रेभ्य एतेषां रूपाणां सम्यक् पठनम्, आवृत्तिः, उच्चारणं च शिक्ष्यते । छात्रा एतानि रूपाणि कण्ठस्थीकुर्वन्ति , यतोहि पठनसमकालं शब्दार्थस्यावगमने यथोचिताभिव्यक्तौ चैतानि बहूपकुर्वन्ति । ततः शब्दानां संयुक्तरूपाणि समासचक्रद्वारा व्याख्यायन्ते । अमरकोषद्वारा शब्दभण्डारोऽभिवर्ध्यते । इत्थं प्रारम्भिकावस्था सम्पद्यते ।

२. प्रथमावस्थाया अवसाने साहित्यस्य परिचयः प्रदीयते । लघुकौमुद्या माध्यमेन प्राथमिकं व्याकरणमध्याप्यते । सूत्राणां कण्ठस्थीकरणात् परं तेषां व्याख्यानं प्रस्तूयते । संस्कृतभाषाया गद्यस्य पद्यस्य च चितान् सुगमांशान् अध्येतुं ज्ञानस्य प्रयोगो भवति । लघुकौमुद्याः परं मध्यकौमुद्याः क्रमोऽनुवर्तते।

३. तत्पश्चात् उत्तरावस्थायां सिद्धान्तकौमुदीम् , पाणिनेः अष्टाध्यायीम् , पतञ्जले: महाभाष्यं चावलम्ब्य व्याकरणस्य गहनाध्ययनं प्रवर्तते । संस्कृतसाहित्यं द्वेधा प्रस्तूयते -

**१. वास्तविका: काव्यग्रन्थाः ।**

**२. अन्यत् विज्ञानं, दर्शनं च, अर्थात् प्रकरणग्रन्थाः ।**

काव्यग्रन्थाः सर्वेभ्योऽनिवार्या भवन्ति। परं छात्रै: अनिवार्यरूपे कतिपयानामेव प्रकरणग्रन्थानाम् अध्ययनम्, अपि च, अन्येषु कतिपयविषयेषु विशेषज्ञताया अवाप्तिरपेक्ष्यते। साहित्यिकसमालोचनायां संस्कृतभाषायां बहुमूल्या सामग्री समुपलभ्यते। विषयेऽस्मिन् ग्रन्थचयने यद्यपि पर्याप्तंभ वैविध्यं लक्ष्यते, परं मम्मटाचार्यस्य काव्यप्रकाशः, विश्वनाथस्य साहित्यदर्पणम्, जगन्नाथपण्डितस्य च रसगंगाधरः - एते ग्रन्था अधिका लोकप्रिया वर्तन्ते। चन्द्रालोकः, कुवलयानन्दः, वक्रोक्तिजीवितम्, काव्यमीमांसा, ध्वन्यालोकः इत्यादयो ग्रन्था अपि शास्त्रिस्तरीयेषु छात्रेष्वतीव लोकप्रिया जाता वर्तन्ते। केदारभट्टस्य वृत्तरत्नाकरः, पिंगलाचार्यस्य

छन्दःशास्त्रम् -इति ग्रन्थद्वयं छन्दःशास्त्रीयाय अध्ययनाय आवश्यकं वर्तते। ततः प्रकरणग्रन्थानां क्रमोऽनुवर्तते। न्याये सम्पूर्ण: सशक्तश्चाधारो निर्मीयते । न्यायस्योपक्रमः सर्वप्रथमं तर्कसंग्रह-तर्कभाषा-न्यायसार-सिद्धान्तमुक्तावली-न्यायमञ्जरीप्रभृतिभिः ग्रन्थैः आरभ्यते। तत्पश्चात् वात्स्यायनस्य महाभाष्येन सहितं सम्पूर्णमपि न्यायदर्शनम् अध्याप्यते। दर्शनस्य अन्याः शाखा अपि प्रारम्भिकग्रन्थैः सहैव प्रारभ्यन्ते। उदाहरणतः, शंकरस्य शारीरिकमीमांसासहितस्य ब्रह्मसूत्रस्य अध्यापनात् प्राक् वेदान्तसार-पञ्चदशी-चतु:सूत्रीप्रभृतीनां ग्रन्थानां परिचयः प्रस्तूयते । समस्तदर्शनानां, ज्योतिष-आयुर्वेदादीनां विज्ञानानां चाध्ययनं वर्गीकृतं स्यात्। उच्चकक्षासु छात्रा व्याकरणं, मीमांसा, ज्योतिषम् इत्यादिभ्यो विषयेभ्य एकस्मिन् विषये दक्षतां प्राप्तुमर्हन्ति ।

**पाठशालाविधेः उल्लेखनीया गुणाः प्रक्रिया च -**

१. चित्रस्मरणशक्त्यपेक्षया अभ्यासस्मरणशक्तिः चिरकालस्थिरं संस्कानरम् अभ्युपेतुमर्हति। रामः, रामौ, रामाः इत्याद्यावृत्तौ कश्चन लयो गतिश्च लक्ष्यते, येन शब्दार्थोऽपि बुध्यत एव। नीरसतामदधानोऽपि संस्कृताध्ययनाय विधिरयं पुनरपि अस्माभिः प्रवर्तनीय एव, यतोहि उत्तरावस्थायां विधिरयं पर्याप्तलाभप्रदः सिद्धयेत्।

२. भाषाशिक्षणस्य पाश्चात्त्यसिद्धान्तानुगुणं पाठशालाविधिरपि लेखनपठनशिक्षणात् प्राक् मौखिकविधिम् अनुसरति। अस्माकं प्राचीनशिक्षणविधौ गुरु-शिष्यसंवाद उल्लेखयोग्यं गुणमावहति। अर्थात् प्रवचनं मौखिकं कार्यं वा शिक्षायाः प्रमुखो विधिरासीत्। अस्य विधेः विशेषा लाभा आसन्। व्याकरणस्य सूत्राणां शब्दरूपाणां पर्याप्तोऽभ्यास: सम्पाद्यते स्म। उच्चारणं परिमार्ज्यते स्म। मन्दमतयश्छात्रा अपि मानसिकप्रक्रियायै प्रोत्साह्यन्ते स्म ।

३. व्याकरणस्य सूत्रेषु, अमरकोषे, समासचक्रे विभिन्नेषु रूपेषु च प्रावीण्यं समधिगत्य संस्कृतशिक्षणाय अतीवोपयोगी सुदृढश्चाधारो विनिर्मीयते। इत्थं छात्रा भाषायामधिकार प्राप्तुमर्हन्ति। कण्ठस्था उक्तयः, सूत्राणि, सुभाषितानि चापि सति समये प्रयोक्तुं शक्यन्ते । वस्तुतः कोऽपि प्रवीणः पण्डितो गतिशीलेन ज्ञानकोषेण समो वर्तते, यो हि अनायासं कमपि विषयजातमुद्धर्तुं शक्नोति। पाठशालाविधेरेव अयं गुणो वर्तते। तथ्यमिदं सर्वमान्यं

यत् या शिक्षा उत विद्वत्ता पुस्तकमात्रमेवाश्रयति, प्रयत्नादृते यस्या उदाहरणम् अभिव्यक्तिश्च न विधातुं शक्येत, सा शिक्षा विद्वत्ता वा निष्फलायते।

४. गतेषु त्रिसहस्रवर्षेषु ये शिक्षणनियमा निरन्तरं विकासं प्राप्तवन्तः, ते सर्वेऽपि पाठशालाविधौ प्रचलिता वर्तन्ते। शब्दार्थस्य अथवा अभिधा-व्यंजना-लक्षणादीनां शब्दशक्तीनां विषये पर्याप्तं विवेचनमभवत्। वाक्यमेव अभिव्यक्तेः एकांशः (Unit) स्वीक्रियते, न तु शब्दः। शब्दानां संहितीकरणात् परं तेषाम् आकांक्षा-योग्यता-सन्निधि-तात्पर्यार्थानाम् आधारे सकलवाक्यस्य अर्थ ऊह्यते। पाणिनेः अष्टाध्याय्यां शब्दोत्पत्तिसम्बन्धे विस्तृताध्ययनं सम्पाद्यते। तर्कान्वितं स्पष्टचिन्तनं विकासयितुं शास्त्राणि चाध्येतुं प्रतिज्ञा-हेतु-उदाहरण-उपनयन-निगमनादीनि पञ्च सोपानानि न्यायशास्त्रात् लभ्यन्ते। एतानि पञ्च सोपानानि हरबार्टमहोदयस्य पञ्चसोपानानां समकक्षतां विधातुमर्हन्ति। मीमांसाशिक्षणाय वेदान्तशिक्षणाय चापि एवम्भूतानि पञ्च सोपानानि समुल्लिखितानि, यथा - व्याख्या, सन्देहः, आपत्तिः, धारणा, योग्यता चेति। गद्यपद्ययो: व्ययाख्या यै दण्डान्वय-खण्डान्वयविधी आविरभवताम् । आद्यः तर्कप्रधानो विधिर्वर्तते। अपरश्च अन्वेषणात्मकः (ह्यूरिस्टिक), मनोवैज्ञानिकः, पाश्चात्त्यशिक्षणविधौ लोकप्रियश्च वर्तते ।साधारणाय पाठनायापि पाणिनीयशिक्षायाम् आभ्यन्तर - बाह्यप्रयत्नानाम्, उच्चारणस्थानानाम्, उच्चारणस्य स्पष्टतायाश्च विशदं व्याख्यानं समभूत्। कविताया नाटकानां च रसानुभूत्यै भरतमुनिः कलात्मकसिद्धान्तान् सविशदं व्याख्यातवान्, यथा- भाव-विभाव-अनुभाव-व्यभिचारिभावानां प्रक्रियया स्थायिभावस्य रसे परिणतिः, नाटकस्य कथानक-बीजबिन्दु-पताका -प्रकरी-कार्याख्यानि पञ्च तत्त्वानि, मनौवैज्ञानिकदृष्ट्या पञ्चावस्थाः (क्रमावस्थाः), यथा- आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागमाः, अपि च, मुख-प्रतिमुख-गर्भ-विमर्श-निर्बहणसञ्ज्ञकानि सन्धेः पञ्च तत्त्वानि । शिक्षणे सूत्रप्रणाल्या विकासो नूनं विलक्षणः कोऽपि वृत्तान्तः । समासत उच्यते यत् प्राचीनभारतीया शिक्षणपद्धतिरेव पाठशालाविधेः आधारशिला वर्तते । प्रतिविषयं शिक्षणरीतिः भेदयुक्तैव भवति। अतः पाश्चात्त्यप्रणाल्याः समक्षम् एतादृशी शिक्षणपद्धतिः न कदापि निराकर्तुं शक्यते।

**परम्परागतविधौ शिक्षणसत्रम्**

श्रावणमासस्य पूर्णिमात: आरभ्य पौषमासस्य पूर्णिमां यावत् अध्ययन-सत्रस्य निर्धारणम् आसीत्, यथोक्तम् -

**श्रावणादिवार्षिकं प्रोष्ठपदीं चोपाकृत्याधीयीत॥**

अस्मिन् एव दिने अद्यत्वे संस्कृतदिवस: सम्मन्यते। पुराकाले आसत्रं ब्राह्ममुहूर्ते जागरणेन सह दिनचर्याया: आरम्भ: भवति स्म। आदिनं यथासमयं पाठपारायणम् , सन्ध्योपासनम्, हवनम् इत्यादीनि कार्याणि भवन्ति स्म।

**परम्परागतविधौ शिक्षणपद्धतय:**

परम्परागतविधौ प्रमुखतया व्याख्यापद्धति: , पारायणपद्धति:, शास्त्रार्थ-पद्धति:, सूत्रपद्धति: इत्यादीनां प्रयोग: भवति स्म। प्रायशस्तु एता: अध्यापक-केन्द्रिता: सन्ति , किन्तु काश्चन पद्धतय: यथा प्रश्नोत्तरपद्धति: , वाकोवाक्पद्धति: (कथोपकथनपद्धति:) , वाद-विवादपद्धति:, उदाहरणकथनम्, दृष्टान्तकथनम् इत्यादीनाम् अपि पद्धतीनां छात्रकेन्द्रितभावनया उपयोग: भवति स्म , यथा हि छान्दोग्योपनिषदि गुरु: शिष्यं लवणस्य जलस्य च सम्मिश्रणं कारयित्वा प्रयोगिकविधिना आत्मपरमात्मनो: ऐक्यं ज्ञापयति। यथा हि-

***यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्संवर्तते तं होवाचात्र वाव किल तत्सोम्य न निभालयसेऽत्रैव किलेति॥***

अस्मिन् विधौ अग्रशिष्यप्रणाली (पितुलाचार्य:) अपि आसीत् , यत्र गुरो: उत्तराधिकारिरूपेण ज्येष्ठशिष्य: अन्यान् कनिष्ठशिष्यान् पाठयति स्म इति।

**पाठशालाविधेः लाभाः–**

१. अस्मिन् विधौ सर्वशः धार्मिकम् आध्यात्मिकं च वातवारणं लक्ष्यते । गुरु -शिष्ययोः घनिष्ठता, अनुशासितं जीवनम् , मनसो वाचः कर्मणश्च पवित्रता इत्यादीनि तस्य वातावरणस्य उल्लेखनीयानि तत्त्वानि सन्ति ।

२. विधिरयं सांस्कृतिक्या आध्यात्मिक्याश्च महत्तायाः कारणात् अपरिहा र्यो वर्तते । अनया प्रणाल्या संस्कृतज्ञानविज्ञानस्य विशेषज्ञा अप्रतिहतमतयो विद्वांसश्च समुत्पद्यन्ते , ये भारतीयां संस्कृतिं भारतीयं दर्शनं च सम्यक् प्रतिपादयितुं, व्याख्यातुं च प्रभवन्ति ।

३. पाठशाला मानसिकस्य अनुशासनस्य , गहनायाः स्मरणशक्तेश्चैकं रम्यं प्रशिक्षणकेन्द्र रूपेण वर्तते । तत्र छात्रैः सकलमपि ज्ञानं हृदयङ्गमीक्रियते । प्रो . आप्टे महोदयस्य शब्देषु , "पाठशालीयाः छात्राः कोषागारस्थं राशिं न विश्वसन्ति प्रत्युत ते साक्षात् मुद्रामेव विश्वसन्ति या कस्मिन्निपि समये प्रयोक्तुं शक्यते"।

४. पाठशालाप्रणाली नैकान् पातोत्पातान् दृष्टवती । अनया प्रणाल्या विश्वविश्रुता विस्मयकराः प्रतिभाशालिनो विद्वांसः समुत्पादिताः , यथा- चरकः , कौटिल्यः , शंकरः , रामानुजः, अभिनवगुप्तः , मध्वाचार्यः , सायनाचार्यः , जगन्नाथपण्डित: इत्यादयो विद्वांसः ।

५. पाठशालाविधिः भारतीयतायाः संस्कृतसाहित्यस्य चान्तरिकाय शोधाय , अनुसन्धानाय च महदुपयुज्यते । 'सर विलियम् जोन्स' , 'बुल्लर' , 'किलहोरन' , 'सर जार्ज ग्रीयर्सन' इत्यादयः पाश्चा त्त्या विद्वांसोऽपि शास्त्राणि अवबो द्धुं पण्डिता नां शरणम् अव्रजन् । यथोक्तं प्रो . हूपरिकरमहोदयेन- 'शास्त्रिणां साहाय्यं विना शोधकर्तारः प्रौढानां संस्कृतग्रन्थानामध्ययने, शोधोपयोगिन्याः सामग्र्याः संग्रहणे च काठिन्यमनुभविष्यन्ति' । अनन्तरकाले आंग्लमाध्यमस्यैव आश्रयत्वाद् इमे ग्रन्था मौलिकग्रन्था इत्यभिधीयन्ते । यद्यपि शोधकार्याय विस्तृताध्ययनात्मिका पाश्चात्त्यप्रणाली ऐतिहासिकं विश्लेषणं चाभीष्टं वर्तते तथापि शास्त्रीयरीत्या ग्रन्थानाम् आन्तरिकम् , आलोचनात्मकं चाध्ययनं बिना न काऽपि महत्त्वपूर्णा उन्नतिः सम्भाव्येत।

**पाठशालाविधेः न्यूनताः-**

१. पाठशालविधेः पाठ्यक्रम एकांगी वर्तते । अयं संकीर्णगहनो वर्तते , न तु व्यापकगहनः । अयं व्यक्तित्वम् एकांगिरूपेण विकासयति । परिणामतो जीवनं प्रति दृष्टिकोणेऽपि संकोचो रूढिवादित्वं च प्रविशति । पाठशालाप्रणाल्याम् ऐतिहासिकाः , तुलनात्मका : आलोचनात्मकाश्च विधयो निराक्रियन्ते ।

२. सम्प्रति स्मरणशक्तौ अत्यधिकं बलं युक्तं नाभिमन्यते । संस्कृतायोगः साधु न्यरूपयत् यत् अत्यधिकबलं स्मरणशक्त्यां प्रदीयते चेत् , प्रगति : विकासश्चावरुध्येत । प्रेरणाशक्तिः मस्तिष्कशक्तिश्चापि ह्रासमुपेयाताम् । बौद्धिको विकासो निश्शेषमवरुध्येत , अभिवृद्धः स्वतन्त्रा गतिशीलता मन्दायेत , बौद्धिकं क्षितिजं च संकीर्ण जायेत । अस्मिन्नेव स्थले आधुनिकाः सिद्धान्ता महोपकारका भवितुमर्हन्ति ।

३. प्राचीनकाले उत्कृष्टतायाः प्रतीकभूतं पाठशालाशिक्षणं कालक्रमेण ह्रासतां प्रयाति । अतोऽस्य शिक्षणस्य नैके बहुफलप्रदा आकर्षकाश्च गुणा लुप्तप्राया वर्तन्ते । मौखिककार्यम्, वादविवादः, शास्त्रार्थश्च अभावोन्मुखा वर्तन्ते । साम्प्रतं निबन्धात्मकपरीक्षाणां प्रवृत्तित्वात् लिखितकार्यमेव अधिकं प्रवर्त्यते। अतः साम्प्रतिकः अध्यापनकार्यक्रमः सर्वथा

निर्जीवो नीरसश्च संवृतः , यत्र कार्यस्य प्राधान्यं तु वर्तते , परं क्रीडा , मनोविनोदश्च न किमपि स्थानमावहतः।

४. माध्यमिकविद्यालयेषु महाविद्यालयेषु च संस्कृतं बहुषु विषयेषु अन्यतमविषयमानं वर्तते । तत्रायं विधिः अव्यावहारिकः सिद्ध्यति । संस्कृतदृष्ट्या वैदेशिके वातावरणे , यत्र प्रतिसप्ताहं चत्वारः पञ्च वा कालांशा एव निर्धार्यन्ते , पाठशालाप्रणालीरूपस्य संस्कृतशिक्षणस्य व्यापकं कार्यक्रमम् अध्यापकोऽनुसर्तुं नार्हति।

**सारांशः-**

उपर्युक्तेन विवेचनेन यत्र पाठाशालाविधे : लाभा लक्ष्यन्ते , तत्रैव काश्चन हानयोऽपि विद्यन्ते । संस्कृतस्य कतिपयेषु विभागेषु गभीराध्ययनाय शोधकार्याय च विधिरयं लाभप्रदो वर्तते । हानीनामपेक्षया लाभा एवास्य विधेः अधिकाः । युगानुगुणं कृतपरिष्कारो विधिरयं बहुलाभप्रदः सिद्ध्येत् । अस्य नैकेषु पक्षेषु परिष्कारोऽपेक्ष्यते । प्रारम्भिकासु अवस्थासु शिक्षणकार्यं सम्भाषणं वार्तालापं चाश्रित्यैव प्रवर्तेत । अपि च , रटन प्रवृत्तिः परिहरणीया । शिक्षणकार्ये मातृभाषाया अनया प्रणाल्या सह अविच्छिन्नः सम्बन्धो भवितुमर्हति । विज्ञान-भूगोल-इतिहास-गणितसदृशानाम् अन्येषामुपयोगिनां विषयाणामपि परिचयः प्रस्तोतुं शक्यते ।

व्याकरणपाठानां वैज्ञानिकप्रस्तुत्याः स्थाने मनोवैज्ञानिकी प्रस्तुतिः सम्पादयितुं शक्यते । प्रारम्भे व्याकरणस्य अनावश्यका नियमा निराकर्तुं शक्यन्ते । पाठान्तरक्रिया: प्रारब्धुं शक्यन्ते । दृश्य-श्रव्यात्मकानां सहायकसाधनानां लाभो ग्रहीतुं शक्यते ।

उपर्युक्तरीत्या परिष्कृते सत्यपि , पुनश्च अस्य विधे : अनेकेषु लाभेषु सत्स्वपि , नायं विधिः माध्यमिकविद्यालयेभ्यो महाविद्यालयेभ्यश्च उपयोगितां धारयितुमर्हति । विद्यालयेषु महाविद्यालयेषु च विविधा अध्ययनविषया भवन्ति । तेषां विषयवस्तु चापि विस्तृतं व्यापकं च भवति । संस्कृतं तु तत्र अनेकविषयेषु अन्यतमो विषयः , यदर्थं प्रतिसप्ताहम् अधिकाधिकाः षट् कालांशा एव प्रकल्प्यन्ते । छात्रा अपि प्रत्येकं सामाजिकवर्गात् समागच्छन्ति ।

पाठशालाप्रणाल्यां छात्राणां समीचीना वंशपरम्परा भवति । नेयं प्रणाली साधारणेभ्य मन्दबुद्धिभ्यश्च छात्रेभ्य उपयुज्यते । एवं विधा: छात्रास्तु विद्यालयेषु संस्कृतस्यान्तरिकं गभीरं चाध्यनं नाकाङ्क्षन्ते । अतो विद्यालयेषु पाठशालाप्रणाल्याः स्थाने कोऽप्यपरो विधिरपेक्ष्यते।

**सन्दयर्भग्रन्थेसूची**

१. Altekar, A.S.(1944); Education in Ancient India, Nand Kishore and Bros., Benares.

२. चतुर्वेदी, सीताराम (१९४९); संस्कृतशिक्षणपद्धति, नन्दकिशोर एण्ड ब्रदर्स, वाराणसी।

३. चौबे, विजयनारायण (१९८५); संस्कृतशिक्षणविधि, उत्तरप्रदेशहिन्दीसंस्थान, लखनऊ।

४. झा, सुरेन्द्रः (२००९); प्राचीनशिक्षापद्धतिः, आशुतोषप्रकाशनम्, लखनऊ।

५. झा, नागेन्द्र (२०१३); प्राचीन एवं अर्वाचीन शिक्षा-पद्धति, अभिषेक प्रकाशन, दिल्लीe।

६. पाण्डेय, रामशकल (२०१०); संस्कृत शिक्षण, श्रीविनोद पुस्तक मन्दिर, आगरा।

७. लक्ष्मीaचन्द्र :, आचार्यः (१९९७)वैदिककालीना शिक्षापद्धतिः, संजयप्रकाशनम्, दिल्लीe।

८. सिंह, कर्ण (२००२); संस्कृत शिक्षण विधि, एच.पी.भार्गव बुक हाउस, आगरा।

## पादटिपण्णीं

---

[i] सुभाषितरत्नभाण्डागारम्, सामान्यनीतिः, ४३१

[ii] अथर्ववेदः, ११/३/५/३

[iii] शतपथब्राह्मणम्, ३/७/३/१०

[iv] मुण्डकोपनिषद्, १/१/४-५

[v] विष्णुपुराणम्, ३/६/२६

[vi] गौतमधर्मसूत्रम्, २/७/१

[vii] छान्दोग्योपनिषद् ६/१३/२